No. 10152. परमार्थस्तुतिः.
PARAMĀRTHASTUTIḤ.

Pages, 2. Lines, 6 on a page.

Begins on fol. 28*a* of the MS. described under No. 9534.

Complete.

Same work as that described under R. No. 171(*c*) of the Triennial Catalogue of MSS., Vol I, Part I–A.

No. 10153. परमार्थस्तुतिः.
PARAMĀRTHASTUTIḤ.

Pages, 4. Lines, 4 on a page.

Begins on fol. 3*b* of the MS. described under No. 9723, wherein this work has been omitted to be mentioned in the list of other works given therein.

Complete.

Same work as the above, but with the addition of an introductory stanza in the beginning as given below:—

वन्देऽहं वरदार्यं तं वत्साभिजनभूषणम् ।
भाष्यामृतप्रदानाद्यः संजीवयति मामपि ॥

No. 10154. परवासुदेवस्तोत्रम्.
PARAVĀSUDĒVASTŌTRAM.

Pages, 4. Lines, 4 on a page.

Begins on fol. 30*a* of the MS. described under No. 9966.

Breaks off in the thirty-fourth stanza.

A hymn in praise of Paravāsudēva, who is considered to be a manifestation of Nārāyaṇa.

Beginning:

श्रीमद्रुरूत्तमयतीन्द्रपराङ्कुशश्रीश्रीशाङ्घ्रिपङ्कजमयीं स्रजमत्युदाराम् ।
उत्तंसयामि यदुरीकरणावलिप्तः स्तोष्यामि देवनगरीपरवासुदेवम् ॥ १ ॥

अविमृश्य वैदिकगिरोऽप्यभूमितां परवासुदेव तव वैभवं स्तुवन् ।
अपहासमर्हति न चैष यजनः फलमेव काङ्क्षति न वेत्ति योग्यताम् ॥ २ ॥

End:

विश्वं यत्सकृदभिसन्धितः ससंज्ञं नित्यं यन्नियतविधा च नित्यभूतिः ।
तस्यैवार्हति मणिमौलिरुत्तमाङ्गमानन्तं तमपि फणासितातपत्रम् ॥ ३३ ॥

शरच्चन्द्राम्भोजामृतरसतटाकादितुलना
प्रशस्तिर्यन्निन्दा(द्रा) यदखिलसुखैकोदयखनिः ।

यदौन्मुख्यं .

No. 10155. परिबृढाष्टकम्.

PARIBṚḌHĀṢṬAKAM.

Pages, 2. Lines. 28 on a page.

Begins on fol. 97*b* of the MS. described under No. **2981.**

Complete.

Eight stanzas in praise of Lord Kṛṣṇa: by Śrīmadācārya**candra**, **who is probably** no other than Vallabhācary**a.**

Beginning:

कलिन्दोद्भूतायास्तटमनुचरन्तीं पशुपजां
रहस्येकां दृष्ट्वा नवसुभगवक्षोजयुगलाम् ।
दृढं नीवीग्रन्थीं श्लथयति मृगाक्ष्या हठतरं
रतिप्रादुर्भावो भवतु सततं श्रीपरिबृढे ॥

End:

इदं यः स्तोत्रं श्रीपरिबृढसमीपे पठति वा
शृणोति श्रद्धावान् रतिपतिपितुः पादयुगले ।

रतिप्रेप्सुः शश्वत्कुवलयदलश्यामलतनौ
रतिप्रादुर्भावो भवतु नचिरात्तस्य सुदृढात् ॥

Colophon:

इति श्रीमदाचार्यचन्द्रविरचितं परिबृढाष्टकं संपूर्णम् ॥

No. **10156.** पश्चिमरङ्गनाथस्तोत्रम्.

PAŚCIMARAṄGANĀTHASTŌTRAM.

Pages, 4. Lines, 6 on a page.

Begins on fol. 2*b* of the MS. described under No. 6487, wherein this work has been mentioned as Raṅganāthastōtra in the list of other works given therein.

Complete.

A hymn in praise of Raṅganātha, a form of Viṣṇu, worshipped at Śrīraṅgapaṭṭaṇa in Mysore; and it is said to be extracted from Paścimaraṅgamāhātmya occurring in the Brahmāṇḍapurāṇa.

Beginning:

देवमाराधयांचक्रुः प्रणिपत्य पुनः पुनः ।
भूयोऽपि गौतमो भक्त्या तुष्टावानन्दगद्गदः ॥
जय सर्वार्थसच्छील जय सद्भाग्यसद्गुण ।
जय पङ्कज(पन्नग)पर्यङ्क जय पद्मायतेक्षण ॥
देवेश भिन्नदैत्याङ्ग देवर्षिध्यानदुर्ग्रह ।
कृपालोऽज दयासिन्धो श्रीरङ्गेश नमोऽस्तु ते ॥

End:

स्तोत्रेण त्वत्कृतेनेह यः स्तोष्यति सदा नरः ॥
सर्वान्कामानवाप्नोति न चेहाजायते पुनः ।
यं यं कामयते कामं तं तमाप्नोत्यसंशयः ॥

Colophon:

इति श्रीब्रह्माण्डपुराणे क्षेत्रखण्डे पश्चिमरङ्गमाहात्म्ये रङ्गनाथस्तोत्रं संपूर्णम् ॥

No. 10157. पश्चिमरङ्गनाथस्तोत्रम्.

PAŚCIMARAṄGANĀTHASTÔTRAM.

Pages, 5. Lines, 5 on a page.

Begins on fol. 39*a* of the MS. described under No. 5922.

Complete.

Same work as the above, but without the introductory stanza and with a different end and colophon as given below :—

यं यं कामयते कामं तं तमर्हत्यसंशयम् ।
इति संचिन्तितं स्तोत्रं गौतमः परया मुदा ॥

Colophon:

इति पश्चिमरङ्गमाहात्म्ये गौतमस्तोत्रं संपूर्णम् ॥

No. 10158. पश्चिमरङ्गराजस्तवः.

PAŚCIMARAṄGARĀJASTAVAḤ.

Pages, 51. Lines, 4 on a page.

Begins on fol. 4*b* of the MS. described under No. 9966.

Complete.

A hundred stanzas similar to the last: by Śrīśailasūri, who seems to be the son of Kauśika Nṛsiṁhārya, a disciple of Vādhūla Śrīnivāsārya.

Beginning:

वाधूलश्रीनिवासार्यकृपासंपन्नवैभवम् ।
कौशिकश्रीनृसिंहार्यं कल्याणगुणमाश्रये ॥ १ ॥

प्रत्यग्रङ्गधुरीणाङ्घ्रिपद्मोत्तंसितमस्तकाम् ।
अस्मद्देशिकपर्यन्तामाश्रये गुरुसन्ततिम् ॥ २॥

पाद्यं यद्यपि वैष्णवं सुरनदीस्नानीयमैशं पुनः
पानीयं बत जाह्नवं किमपरं ज्योत्स्नोदकं सागरम् ।

स्वं पूर्वापरयोः कवेरतनये रङ्गेशपादाम्बुज-
द्वन्द्वैकान्त्यमनुज्झती ननु परं श्रीवैष्णवे श्रेयसि ॥ ३ ॥

* * * *

यात्रापर्वसु मानवैरनिमिषैर्मुक्तैश्च नित्यैर्विभोः
सौन्दर्येशनशीलविद्धकरणैराबद्धदास्योत्सवैः ।
लीलानित्यविभूतिनिश्चयदशावैदेशिकश्रीसखं
दि॰व्यं पश्चिमरङ्गनाम परमं धामानिशं संश्रये ॥ ९ ॥

* * * *

नमः श्रीरङ्गाय प्रणववपुषे भव्यमहसे
विमानेन्द्रायान्तर्विसृमरमहानीलमणये ।
नमोऽन्तःस्तम्भाभ्यां पृथुलफणिफूत्कारपवना-
हितामोदाख्याभ्यामखिलपरिवाराय च नमः ॥ ६८ ॥

Colophon:

इति श्रीकौशिककुलतिलकश्रीशैलसूरिविरचिते पश्चिमरङ्गराजस्तवे पूर्व-पञ्चाशत् समाप्ता ॥

मज्जीवितं मम धनं मम दैवतं वा
माङ्गल्यतुङ्गमधिरङ्गमिदं चकास्ति ।
श्रीभूस्तनांसपरिबृंहितपार्श्वभाग्यं(गं)
पद्माक्षिपाणिचरणं परमाभिरूप्यम् ॥ १ ॥

End:

प्रत्यग्रङ्गनिधे प्रसीद श(शि)शिरं पश्यादियस्व व्रतं
स्वीयं संस्मर विस्मरापचरितान्यस्माकमार्द्राण्यपि ।
त्राहि त्राहि दयस्व द(दे)हि सुधियं त(त्व)त्पादपाथोजयो-
र्भक्तिं लम्भय हे विजृम्भय मयि त्वद्दासदास्यश्रियम् ॥ ५० ॥

Colophon:

इति श्रीकौशि(क)कुलतिलकश्रीशैलसूरिविरचिते पश्चिमरङ्गराजस्तवे उत्तरपञ्चाशत्समाप्ता ॥

No. 10159. पश्चिमरङ्गराजस्तवः.

PAŚCIMARAṄGARĀJASTAVAḤ.

Pages, 54. Lines, 4 on a page.

Begins on fol. 1*a* of the MS. described under No. 9965.

Complete.

Same work as the above.

No. 10160. पश्चिमरङ्गराजस्तवः.

PAŚCIMARAṄGARĀJASTAVAḤ.

Pages, 32. Lines, 4 on a page.

Begins on fol. 28*a* of the MS. described under No. 9965, wherein this work has been mentioned as **Raṅganāthastava** in the list of other works given therein.

Breaks off in the 40th stanza of the Pūrvapañcāśat.

Same work as the above.

No. 10161. पश्चिमरङ्गराजाष्टकम्.

PAŚCIMARAṄGARĀJĀṢṬAKAM.

Pages, 4. Lines, 6 on a page.

Begins on fol. 24*a* of the MS. described under No. 7096, wherein this work has been mentioned as **Paścimaraṅgamaṅgalāśaṁsana** in the list of other works given therein.

Complete.

Eight stanzas similar to the last: by Vāsudēva.

Beginning:

श्रीमत्पश्चिमरङ्गनामनगरीमध्ये सुजाम्बूनदैः
प्राकारामितगोपुरैर्विलसिते शेषे विमाने स्थिते ।
शायी सत्करसूचिताङ्घ्रिमकुटो रङ्गी जगद्धारकः
कावेरीपरिवेष्टितः कविनुतः कुर्याद्धरिर्मङ्गलम् ॥ १ ॥

End :

एतन्मङ्गलदं समस्तफलदं श्रीवासुदेवेरितं
जन्मर्क्षादिदिने[शुभे] क्रियासु सततं रङ्गेश्वरस्याष्टकम् ।
ये शृण्वन्ति पठन्ति देवपुरतस्तेषां सुखं शाश्वतं
कावेरीपरिवेष्टितः कविनुतः कुर्याद्धरिर्मङ्गलम् ॥ ९ ॥

No. 10162. प्रातस्स्मरणीयश्लोकत्रयम्.

PRĀTASSMARAṆĪYAŚLŌKATRAYAM.

Pages, 2. Lines, 19 on a page.

Begins on fol. 90*a* of the MS. described under No. 5764

Complete.

Three stanzas in praise of Kṛṣṇa. They are intended to be repeated in the early morning; and such a repetition is said to absolve one from sins. The work is also called Harirāja.

Beginning :

प्रातः स्मरामि वरकुण्डलशोभिगण्ड-
शीतांशुमण्डलमुखं शितवारिजाक्षम् ।
आतान्त्वकर्ममृदिताधरबिम्बजृम्भि ?
ध्यातुः प्रहर्षकरणानर(ल)सं रमेशम् ॥ १ ॥

End :

प्रातर्नमामि शुभकिङ्किणिमेखलाङ्गं पीताम्बरं करिकरोरुमुदारजानुम् ।
ख्याताङ्घ्रियुग्मरुचिराञ्चितकञ्जजातपादादिदेववरमौलिमणिं मुकुन्दम् ॥ ३ ॥
हरिराजमिति प्रोक्तं श्लोकत्रयमिदं परम् ।
प्रातः काले पठेन्मर्त्यः पार्देःपतिमुच्चितां (पापेभ्यः प्रतिमुच्यते) ॥

No. 10163. प्रातस्स्मरणीयश्लोकपञ्चकम्.

PRĀTASSMARAṆĪYASLŌKAPAÑCAKAM.

Pages, 2. Lines, 6 on a page.

Begins on fol. 52*a* of the MS. described under No. 1582.

Complete.

Similar to the above, but herein Rama is the subject of praise in five stanzas.

Beginning :

प्रातः स्मरामि रघुनाथमुखारविन्दं मन्दस्मितं मधुरभाषि विशालफालम् ।
कर्णावलम्बिचलकुण्डलशोभिगण्डं कर्णान्तदीर्घनयनं नयनाभिरामम् ॥ १ ॥

End :

प्रातः स्मरामि वचसा रघुनाथनाम
वाग्दोषहारि सकलं कलुषं निहन्ति(न्तृ) ।
यत्पार्वती स्वपतिना सह भोक्तुकामा
प्रीत्या सहस्रहरिनामसमं जजाप ॥ ५ ॥
यः श्लोकपञ्चकमिदं नियतः पठेत
नित्यं प्रभातसमये पुरुषः प्रबन्धम् ।
श्रीरामकिंकरजनेषु स एव मुख्यो
भूत्वा प्रयाति हरिलोकमनन्यलभ्यम् ॥ ६ ॥

No. **10164.** प्रातस्स्मरणीयस्तोत्रम्.

PRĀTASSMARAṆĪYASTŌTRAM.

Pages, 2. Lines, 5 on a page.

Begins on fol. 1*a* of the MS. described under No. 430.

Complete.

Same work as the above.

No. **10165.** प्रातस्स्मरणीयस्तोत्रम्.

PRĀTASSMARAṆĪYASTŌTRAM.

Pages, 2. Lines, 6 on a page.

Begins on fol. 79*b* of the MS. described under No. 9012 and not on fol. 97*b* as stated therein.

Complete.

Similar to the work described under R. No. 673(*k*) of the Triennial Catalogue of MSS., Vol. I, Part I-C.

Beginning and **End :**

ग्राहग्रस्ते गजेन्द्रे रुवति सरभसं तार्क्ष्यमारुह्य धावन्
व्याघूर्णन्माल्यभूषावसनपरिकरो मेघगम्भीरघोषः ।

आबिभ्राणो रथाङ्गं शरमसिमभयं शङ्खचापौ सखेटौ
हस्तैः कौमोदकीमप्यवतु हरिरसावंहसां संहतेर्नः ॥ १ ॥
प्रातर्नमामि मनसा वचसा च मूर्ध्ना पादारविन्दयुगलं परमस्य पुंसः ।
नारायणस्य नरकार्णवतारणस्य पारायणप्रवणविप्रपरायणस्य ॥ २ ॥
प्रातर्भजामि भवभीतिमहार्तिशान्त्यै नारायणं गरुडवाहनमब्जनाभम् ।
ग्राहाभिभूतमदवारणमुक्तिहेतुचक्रायुधं तरुणवारिजपत्रनेत्रम् ॥ ३ ॥
श्लोकत्रयमिदं पुण्यं प्रातः प्रातः पठेन्नरः ।
लोकत्रयगुरुस्तस्मै दद्यादात्मपदं हरिः ॥ ४ ॥

No. 10166. प्रातस्स्मरणीयस्तोत्रम्.
PRĀTASSMARAṆĪYASTŌTRAM.

Page, 1. Lines, 19 on a page.

Begins on fol. 90*a* of the MS. described under No. 5764.

Complete.

Same work as the above, but with a different beginning as given below :—

प्रातः स्मरामि दनि(धि)घोषविधूतनिद्रं
निद्रावसानरव(म)णीयमुखारविन्दम् ।
हृद्यानवद्यवपुषेर्न(षं न)यनाभिराम-
मुन्निद्रपद्मनयनं नवनीतचोरम् ॥ २ ॥

No. 10167. प्रातस्स्मरणीयस्तोत्रम्.
PRĀTASSMARAṆĪYASTŌTRAM.

Pages, 2. Lines, 5 on a page.

Begins on fol. 1*b* of the MS. described under No. 130. wherein this work has been omitted to be mentioned in the list of other works given therein.

Complete.

Same work as the above, but with the addition of one stanza at the end as given below. The concluding stanza is slightly altered so as to suit the addition thus made.

प्रातर्भजामि भजतामभयंकरं तं
प्राक्सर्वजन्मकृतपापभयापनुत्यै ।
यो ग्राहवक्रपतिताङ्घ्रिगजेन्द्रघोर-
शोकप्रणाशनकरो धृतशङ्खचक्रः ॥
चतुःश्लोकमिदं पुण्यं प्रातः प्रातः पठेन्नरः ।
लोकत्रयगुरुस्तस्मै दद्यादात्मपदं हरिः ॥

No. **10168.** प्रातस्स्मरणीयस्तोत्रम्.
PRĀTASSMARAṆĪYASTŌTRAM.

Page, 1. Lines, 7 on a page.

Begins on fol. 92*b* of the MS. described under No. 633.

Complete.

Same work as the above, but with the addition of one stanza at the end. The concluding stanza is again modified so as to suit this further addition :—

प्रातः (प्रसन्न)वदनं धृतशार्ङ्गचक्र-
शङ्खासिदण्डविलसद्धृत(भुज)मीशितारम् ।
श्रीवत्सकौस्तुभविराजितबाहुमध्यं
(नारायणं)गरुडवाहनमञ्जनाभम् ॥ ५ ॥
श्लोकपञ्चकामिदं पुण्यं प्रातरुत्थाय यः पठेत् ।
लोकत्रयगुरुस्तस्मै दद्यादात्मपदं हरिः ॥

No. **10169.** बालकृष्णध्यानम्.
BĀLAKṚṢṆADHYĀNAM.

Page, 1. Lines, 6 on a page.

Begins on fol. 53*a* of the MS. described under No. 158, wherein this work has been mentioned as Kṛṣṇaviṣayakagāna in the list of other works given therein.

Wants beginning ; otherwise complete.

In praise of Kṛṣṇa conceived as a child

Beginning:

. . . . खिलसत्यं सदा बालकृष्णं कलय सखि सुन्दरम् ॥ २ ॥
रामेण जगदभिरामेण समवस्त्रकामेन सह श्रीकृष्णम् ॥ ३ ॥

End:

अर्थे शिथीलीकृत(ता)नर्थे श्रीनारायणतीर्थे परमपुरुषार्थे सदा बालकृष्णं कलय सखि सुन्दरम् ॥ ८ ॥

No. 10170. बालकृष्णाष्टकम्.
BĀLAKṚṢṆĀṢṬAKAM.

Pages, 3. Lines, 5 on a page.

Begins on fol. 4*b* of the MS. described under No. 9920.

Complete.

Eight stanzas in praise of Kṛṣṇa conceived as a child.

Beginning:

लीलया कुचेलमौलिपालितं कृपानिधिं
नीलनीरदेन्द्रनीलनीलकान्तिमोहनम् ।
बाललोलचारुकोमलालकं विलासगो-
पालबालजारचोरबालकृष्णमाश्रये ॥ १ ॥

End:

रङ्गबिन्दुरङ्गसंगमङ्गलाङ्गसौरभं
सङ्गरासुरोत्तमाङ्गभङ्गविप्रकारकम् ।
रङ्गवैभवाभिराममङ्गनायकं सुगो-
पालबालजारचोरबालकृष्णमाश्रये ॥ ८ ॥

Colophon:

इति बालकृष्णाष्टकं संपूर्णम् ॥

No. 10171. बिन्दुमाधवाष्टकम्.
BINDUMĀDHAVĀṢṬAKAM.

Pages, 2. Lines, 5 on a page.

Begins on fol. 53*b* of the MS. described under No. 5858.

Complete.

Same work as that described under R.No. 488(*h*) of the Triennial Catalogue of MSS., Vol. I, Part I-B, but with the addition of a colophon as given below.

Eight stanzas in praise of Mādhava or the Lord of Lakṣmī and describing his ten incarnations. The work is stated to be composed by a devotee of Narasiṁha and in the colophon he is called Śaṅkarācārya.

Colophon:

श्रीशङ्कराचार्यविराचितं बिन्दुमाधवाष्टकं संपूर्णम् ॥

No 10172. भगवद्ध्यानसोपानम्.

BHAGAVADDHYĀNASŌPĀNAM.

Pages, 5. Lines, 6 on a page.

Begins on fol. 48*b* of the MS. described under No. 9388.

Complete.

Same work as that described under R.No. 660(*h*) of the Triennial Catalogue of MSS., Vol. I, Part I-C, but with colophon as given below:—

इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु भगवद्ध्यानसोपानं संपूर्णम् ॥

No. 10173. भगवद्ध्यानसोपानम्.

BHAGAVADDHYĀNASŌPĀNAM.

Pages, 2. Lines, 7 on a page.

Begins on fol 29*a* of the MS. described under No. 9012.

Complete.

Same work as the above, but with a brief colophon as given below:—

भगवद्ध्यानसोपानं संपूर्णम् ॥

No. 10174. भगवद्ध्यानसोपानम्.

BHAGAVADDHYĀNASŌPĀNAM.

Pages, 2. Lines, 19 on a page.

Begins on fol. 34*b* of the MS. described under No. 2043

Complete.

Same work as the above.

No. 10175. भगवद्ध्यानसोपानम्.

BHAGAVADDHYĀNASŌPĀNAM.

Pages, 2. Lines, 7 on a page.

Begins on fol. 68*b* of the MS. described under No. 9610.

Complete.

Same work as the above, but with colophon as समाप्तेयं स्तुतिः.

No. 10176. भगवद्ध्यानसोपानम्.

BHAGAVADDHYĀNASŌPANAM.

Pages, 4. Lines, 5 on a page.

Begins on fol. 26*a* of the MS. described under No. 8904.

Complete.

Same work as the above, but without a colophon.

No. 10177. भगवद्ध्यानसोपानम्.

BHAGAVADDHYĀNASŌPĀNAM.

Pages, 5. Lines, 4 on a page.

Begins on fol. 62*a* of the MS. described under No. 8904.

Wants beginning; otherwise complete. The leaves are written on one side.

Same work as the above

No. 10178. भगवद्ध्यानसोपानम्.

BHAGAVADDHYĀNASŌPĀNAM.

Pages, 15. Lines, 3 on a page.

Begins on fol. 27*b* of the MS. described under No. 9723.

Complete.

Same work as the above, but with the addition of two stanzas at the end as given below :—

अपराधसहस्रभाजनं पतितं भीमभवार्णवोदरे ।
अगतिं शरणागतं हरे कृपया केवलमात्मसात्कुरु ॥
त्वमेव माता च पिता त्वमेव त्वमेव बन्धुश्च गुरुस्त्वमेव ।
त्वमेव विद्या द्रविणं त्वमेव त्वमेव सर्वं मम देवदेव ॥

No. 10179. भद्राचलरामचन्द्रस्तोत्रम्.

BHADRĀCALARĀMACANDRASTŌTRAM

Pages, 2. Lines, 6 on a page.

Begins on fol. 25*a* of the MS. described under No. 9661, wherein this work has been mentioned as Rāmastōtra in the list of other works given therein.

Complete.

A hymn consisting of seven stanzas in praise of Rāma as worshipped in the temple at Bhadrācala on the banks of the river Gōdāvarī.

Beginning :

श्रीमन्निर्मलपुण्यवैभवसुधाप्रायाम्बुगोदावरे
तीरे कल्पककाननान्तररुहश्रीभद्रशैलान्तरे ।
शोभायुक्तविचित्ररत्नखचिते सिंहासने संस्थितं
श्रीभद्राचलरामचन्द्रमनिशं सीतासमेतं भजे ॥ १ ॥

End :

धीरं गौतमदारशापहरणं गाम्भीर्यवारां निधिं
नित्यानन्दमनेकनिर्मलगुणैर्भूतिप्रदं भूपतिम् ।

भक्तप्रीतिकरं भवार्तिहरणं भाग्यप्रदं राघवं
श्रीभद्राचलरामचन्द्रमनिशं सीतासमेतं भजे ॥ ७ ॥

No. 10180. भीष्मस्तुतिः.
BHĪṢMASTUTIḤ.

Pages, 2. Lines, 9 on a page.

Begins on fol. 8*a* of the MS. described under No. 7536.

Complete.

This hymn in praise of Kṛṣṇa is apparently attributed to Bhīṣma.

Beginning:

श्रीभीष्मः—

इति मतिरुपकल्पिता वितृष्णा भगवति सात्वतपुङ्गवे विभूम्नि ।
स्वसुखमुपगते क्वचिद्विहर्तुं प्रकृतिमुपेयुषि यद्भवप्रवाहः ॥
त्रिभुवनकमलं(नं) तमालवर्णं रविकरगौरवराम्बरं दधाने ।
वपुरलककुलावृताननाब्जं विजयसखे रतिरस्तु मेऽनवद्या ॥

End:

क्षितिभरमवरोपितुं कुरूणां श्वसन इवासृजदक्षवंशवह्निम् ।
तमिममहमनुव्रतार्तिहाङ्घ्रिं हृदि परिरभ्य[जहा] जहामि मर्त्यनीडम् ॥

No. 10181. भीष्मस्तुतिः.
BHĪṢMASTUTIḤ.

Substance, palm-leaf. Size, $15\frac{3}{4} \times 1\frac{1}{4}$ inches. Pages, 4. Lines, 3 on a page. Character, Kanarese. Condition, good. Appearance, new.

Same work as the above, but with a different end as given below :—

End:

एवं कृष्णे भगवति मनोवाग्दृष्टिवृत्तिभिः ।
आत्मन्यात्मानमावेश्य सोऽन्तःश्वास उपारमत् ॥

No. 10182. भुजङ्गप्रयाताष्टकम्.
BHUJAṄGAPRAYĀTĀṢṬAKAM.

Pages, 2. Lines, 26 on a page.

Begins on fol. 76*a* of the MS. described under No. 2981.

Complete.

Eight stanzas written in the Bhujaṅgaprayāta metre in praise of Lord Kṛṣṇa : by Viṭṭhalēśvara.

Beginning:

सुधाधामनैजाधराधारवेणुं कराग्रैरुदग्रैरतिव्यग्रशीलैः ।
सदा पूरयंश्चारयन् गोवरूथान् पुरः प्रादुरास्तां सदाभीरवीरः ॥ १ ॥

End:

कुरङ्गीदृशामङ्गसङ्गेन शश्वन्निजानन्ददानन्दकन्दालिकाल ।
कलिन्दोद्भवोद्भूतपङ्केरुहाक्ष स्वभक्तानुरक्त कृपाद प्रसीद ॥ ८ ॥
भुजङ्गप्रयाताष्टकेनानुयातो भुजङ्गे शयानं हरिं संस्तुवीत ।
रतिस्तस्य कृष्णे भवत्याशु नित्या किमन्यैः फलैः फल्गुभिः सेव कः स्यात् ॥

Colophon:

इति श्रीविट्ठलेश्वरविरचितं भुजङ्गप्रयाताष्टकं संपूर्णम् ॥

No. 10183. मङ्गलाष्टकम्.
MAṄGALĀṢṬAKAM.

Substance, palm-leaf. Size, $8\frac{3}{8} \times 1\frac{3}{8}$ inches. Pages, 8. Lines, 5 on a page. Character, Nandināgarī. Condition, slightly injured. Appearance, old.

Begins on fol. 1*a* The other works herein are Dharaṇīstōtra 6*a*, Madhvagurucaramaślōka 8*a*, Maṅgalāṣṭaka 9*a*, Śivamaṅgalāṣṭaka 12*a*.

Complete.

Eight stanzas of praise addressed to Hari or Viṣṇu and praying for prosperity : by Vādirājēśvara.

The MS. is said to have been copied by Nārāyaṇabhaṭṭa who completed it on the tenth day of the bright fortnight in the month of Puṣya of the year Āṅgīrasa.

Beginning:

लक्ष्मीर्यस्य परिग्रहः कम(ल)भूः सूनुर्गरुत्मान् रथः
पौत्रश्चन्द्रविभू(ष)णः सुरगुरुः शेषस्य(श्र)शया(य्या)पुनः ।
ब्रह्माण्डं वरमन्दिरं सुरगणा यस्य प्रभोः सेवकाः
स त्रैलोक्यकुटुम्बपालनपरः कुर्याद्धरिर्मङ्गलम् ॥ १ ॥

End:

इत्येतद्वरमङ्गलाष्टकमिदं श्रीवादिराजेश्वरै-
राख्यातं जगतामभीष्टफलदं सर्वाशुभध्वंसनम् ।
माङ्गल्यादिशुभक्रियासु सततं सन्ध्यासु वा यः पठेत्
धर्मार्थादिसमस्तवाञ्छितफलं प्राप्नोत्यसौ मानवः ॥

No. 10184. मज्जनशतकम्.
MAJJANAŚATAKAM.

Pages, 9. Lines, 8 on a page.

Begins on fol. 287*a* of the MS. described under No. 9001.

Contains the first 66 stanzas only.

In praise of Raṅganātha worshipped at Śrīraṅgam whose sacred image is here conceived as being bathed with water.

Beginning:

दीक्षासंश्रितलक्षणव्रतविधिर्दिव्योत्सवत्व(स्त्व)न्मख-
स्त्वद्भक्तप्रतिघातिनः पशुगा(गणा)स्त्वत्का(अमी)ऋत्विजः ।
वेदिर्दीप्तविभावसुद्युतिरसौ विश्वप्रकर्षं फलं
पत्नी यत्तव रङ्गपुङ्गव रमा सा चास्त्व(स्त्वि)यं दक्षिणा ॥ १ ॥
काश्मीरप्रचयः प्रभातसमयः कस्तूरिका यामिनी
कर्पूरप्रसरश्च वासररुचिं धत्ते विशुद्धद्युतिः ।
इत्थं रङ्गपुरीधुरीण युगपत्त्रैकाल्यसंपत्तितः
कालानां क्रमभङ्गकृत्तव भवत्यन्यादृशोऽयं क्रमः ॥ २ ॥

* * * *

मालापुष्पितबाहु रङ्गनृपतेर्माङ्गल्यभूषोज्वलं
कस्तूरीघनसारयोगघटितज्योतंमर्यतं(द्योताङ्गरागैर्युतम्) ।
चूडासौरभसाभिलाषवकुलं सूक्ष्मांशुकालंकृतं
नैदाघस्नपने तवाद्य कृतिभिर्नैपथ्यमास्वाद्यते ॥ ८ ॥

End:

भुजविटपिमनोज्ञस्कन्धकं रङ्गधामन्
फलमनवधि पुंसां भावयन्तं भवन्तम् ।
विमलसलिलपूर्णे पेटिकादुग्धसिन्धौ
परिणमि तव मन्ये पारिजातं सुजातम् ।। ९६ ॥

No. 10185. मदनगोपालस्तोत्रम्.

MADANAGŌPĀLASTŌTRAM.

Pages, 4. Lines, 16 on a page.

Begins on fol. 9*b* of the MS. described under No. 424.

Complete.

In praise of Lord Kṛṣṇa conceived as a love inspiring charming cowherd.

Beginning:

श्रृणु देवि प्रवक्ष्यामि रहस्यं भुवनेश्वरि ।
तवैव पौरुषं रूपं गोपिकानयनामृतम् ॥
सदा निषेवितं रागो भवद्विरहभीरुणा ।
सत्यभामादिरूपाभिर्मायामूर्तिभिरष्टभिः ॥

* * * *

ईश्वर उवाच—

श्रीमद्बालार्कसंकाशं पद्मरागमणिप्रभम् ।
बन्धूकबन्धुरालोकसन्ध्यारागारुणद्युतिम् ॥

मकुटानेकमाणिक्यप्रभापल्लविताम्बरम् ।
किरीटोपान्तविन्यस्तबर्हिबर्हावतंसकम् ॥

End:

क्रूरदुन्दुभिनिर्घोषैः मुक्तप्रसववृष्टिभिः ।
ध्यायेन्मदनगोपालं मन्त्री शुचिरलंकृतम् ॥
यः पठेन्मदनगोपालध्यानस्तोत्रं समाहित(:) ।
सर्वा(न्)कामानवाप्नोति दुर्लभानप्ययत्नतः ॥

Colophon:

इति श्रीमदनगोपालध्यानस्तोत्रं संपूर्णम् ॥

No. **10186.** मधुसूदनाष्टकम्.

MADHUSŪDANĀṢṬAKAM.

Pages, 2. Lines, 4 on a page.

Begins on fol. 9*a* of the MS. described under No. 9869.

Contains the first four stanzas only.

This is a hymn of praise and prayer addressed to **Madhusūdana** who is none else than Viṣṇu conceived as the **destroyer of the** demon Madhu.

Beginning:

शरणं भव करुणां मयि कुरु दीनदयालो
करुणारसवरुणालय करिराजकृपालो ।
अधुना खलु विधिना मयि सुधिया सुरफलितं
मधुसूदन मधुसूधन हर मामकदुरितम् ॥ १ ॥

End:

हरिभीकर हरसोदर परिपूर्णसुधाब्धे
नरकान्तक नरपालक परिपालितजलधे ।
हरिसेवक शिवनारायण वरतीर्थपरात्मन्
मधुसूदन मधुसूदन हर मामकदुरितम् ॥ ४ ॥

No. 10187. महापुरुषचरणारविन्दस्तोत्रम्.

MAHĀPURUṢACARAṆĀRAVINDASTŌTRAM.

Pages, 4. Lines, 3 on a page.

Begins on fol. 3*b* of the MS. described under No. 10016.

Complete.

In praise of Viṣṇu offering salutations to His feet.

Beginning:

ध्येयं सदा परिभवघ्नमभीष्टदोहं तीर्थास्पदं शिवविरिञ्चिनुतं शरण्यम् ।
भृत्यार्तिहं प्रणतपाल भवाब्धिपोतं वन्दे महापुरुष ते चरणारविन्दम् ॥

End:

यत्कालियोरगफणामणिरत्नशोणं गोपाङ्गनाकरसरोरुहयोगयोग्यम् ।
नानाविधश्रुतिलतोत्पलमूलकन्दं वन्दे महापुरुष ते चरणारविन्दम् ॥

No. 10188. माधवस्तवराजः.

MĀDHAVASTAVARĀJAḤ.

Pages, 30. Lines, 4 on a page.

Begins on fol. 30*a* of the MS. described under No. 6101.

Complete.

This is a hymn in praise of Mādhava or Viṣṇu and is said to form the fifteenth Adhyāya of the Māghamāhātmya in the Vāyupurāṇa. A repetition of this hymn is considered to free one from one's sins.

Beginning:

कुटीरस्था उचुः—

स्तोत्रमेतन्महापुण्यं यत्त्वयोक्तं द्विजोत्तम ।
माधवस्तवराजं तु श्रोतुमिच्छामहे वयम् ॥
किं फलं तस्य पठने केन लोके प्रकाशितम् ।

गालवः—

पादौ प्रक्षाल्य चाचम्य कृतन्यासः कृतासनः ।
स्तोत्रमेतत्पठेन्नित्यं माघमासे विशेषतः ॥

आदौ नत्वा गुरून् सर्वान् पश्चाद्वामे च पार्श्वके ।
पापं च पुरुषं ध्यात्वा स्पृष्ट्वा दक्षिणतस्ततः ॥
* * * *
अच्युतानन्त गोविन्द प्रणतार्तिप्रणाशन ।
देहि मेऽद्य मनःशुद्धिं त्वन्नामस्मरणाद्धरे ॥
हृषीकेश जगद्रूपिन् सर्वसाक्षिन् दयानिधे ।
इन्द्रियाण्यनुकूलानि सदा धर्मेषु मे कुरु ॥

End:

माधवस्तवराजोऽयं पापगुल्मदवानलः ।
धर्मादिमोक्षपर्यन्तपुरुषार्थस्य कारणम् ।
यः पठेत्पुण्यकाले तु स्तवराजं महामनुम् ।
कल्पकोटिसहस्रेषु मोदते विष्णुमन्दिरे ॥

Colophon:

इति श्रीमाघमाहात्म्ये वायुपुराणे पञ्चदशोऽध्यायः ॥

No. **10189.** माधवस्तवराजः.
MĀDHAVASTAVARĀJAḤ.

Pages, 15. Lines, 5 on a page.

Begins on fol 13*a* of the MS. described under No. 8920.

Complete.

Same work as the above, but with the addition of twenty-five stanzas in the beginning in praise of Māghasnāna.

No **10190.** माधवस्तवराजः.
MĀDHAVASTAVARĀJAḤ.

Pages, 14. Lines, 5 on a page.

Begins on fol. 9*a* of the MS. described under No. 6485.

Wants beginning.

Same work as the above.

No. 10191. मार्कण्डेयाष्टकम्.
MĀRKAṆḌĒYĀṢṬAKAM.

Pages, 2. Lines, 6 on a page.

Begins on fol. 36*a* of the MS. described under No. 115, wherein this work has been omitted to be mentioned in the list of other works given therein.

Complete ; as found in the Mārkaṇḍēyapurāṇa.

Eight stanzas in praise of Viṣṇu stated to have been composed by Mārkaṇḍēya.

Beginning :

नारायणं सहस्राक्षं पद्मनाभं पुरातनम् ।
प्रणतोऽस्मि हृषीकेशं किं नो मृत्युः करिष्यति ॥

End :

हृत्पद्ममध्ये पुरुषं पुराणं नारायणं शाश्वतमादिदेवम् ।
संचिन्त्य सूर्ये हृदि राजमानं मृत्युं जयेदाशु हरेः प्रसादात् ॥

Colophon :

इति मार्कण्डेयपुराणे मार्कण्डेयस्तोत्रं संपूर्णम् ॥

No. 10192. मार्कण्डेयाष्टकम्.
MĀRKAṆḌĒYĀṢṬAKAM.

Page, 1. Lines, 18 on a page.

Begins on fol. 1*a* of the MS. described under No. 2380.

Complete

Same work as the above, but with the addition of two stanzas at the end as given below and without colophon :—

इत्यष्टकमिदं पुय मृत्युप्रशमनं शुभम् ।
मार्कण्डेयहितार्थाय स्वयं विष्णुः प्रसीदति ॥
इदं यः पठते नित्यं त्रिकालं नियतः शुचिः ।
अकाले तस्य मृत्युः स्यान्नरस्य न कदाचन ॥

No. **10193.** मुकुन्दमाला.

MUKUNDAMĀLĀ.

Pages, 12. Lines, 5 on a page.

Begins on fol. 20*a* of the MS. described under No. **9781.**

Complete.

Same work as that described under R.No. 174(*d*) of the Triennial Catalogue of MSS., Vol. I, Part I–A.

No. **10194.** मुकुन्दमाला.

MUKUNDAMĀLĀ.

Pages, 12. Lines, 5 on a page.

Begins on fol. 1*a* of the MS. described under No. 9652.

Complete.

Same work as the above.

No. **10195.** मुकुन्दमाला.

MUKUNDAMĀLĀ.

Pages, 9. Lines, 10 on a page.

Begins on fol. 7*a* of the MS. described under No. 3877.

Complete.

Same work as the above

No. **10196.** मुकुन्दमाला.

MUKUNDAMĀLĀ.

Substance, palm-leaf. Size, $12\frac{3}{4} \times 1\frac{3}{8}$ inches. Pages, 22. Lines, 5 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Begins on fol. 51*a*. The other work herein is Śrīraṅgamāhātmya 1*a*.

Complete.

Same work as the above.

No 10197. मुकुन्दमाला.

MUKUNDAMĀLĀ.

Pages, 8. Lines, 24 on a page.

Begins on fol. 100*a* of the MS. described under No. 5959.
Complete.
Same work as the above, but with colophon as given below :—

मुकुन्दमालास्तोत्रं संपूर्णम् ॥

No. 10198. मुकुन्दमाला.

MUKUNDAMĀLĀ.

Pages, 5. Lines, 7 on a page.

Begins on fol. 30*a* of the MS. described under No. 9534.
Breaks off in the twenty-seventh stanza.
Same work as the above.

No. 10199. मुकुन्दमाला.

MUKUNDAMĀLĀ.

Pages, 13. Lines, 7 on a page.

Begins on fol. 57*a* of the MS. described under No. 8900.
Breaks off in the thirty-eighth stanza.
Same work as the above.

No. 10200. मुकुन्दमाला.

MUKUNDAMĀLĀ.

Pages, 6. Lines, 8 on a page.

Begins on fol. 186*a* of the MS. described under No. 9001.
Wants the first two stanzas; otherwise complete.
Same work as the above, but with colophon as given below :—

इति कुलशेखरपरिसमर्थिता मुकुन्दमाला परिसमाप्ता ॥

No. 10201. मुकुन्दमाला.

MUKUNDAMĀLĀ.

Pages, 12. Lines, 5 on a page.

Begins on fol. 23*a* of the MS. described under No. 9683.

Breaks off in the 37th stanza.

Same work as the above, but without the introductory stanzas.

No. 10202. मुकुन्दमाला.

MUKUNDAMĀLĀ.

Page, 1. Lines, 19 on a page.

Begins on fol. 1*a* of the MS. described under No. 2886.

Wants two stanzas in the beginning and breaks off in the thirty-third stanza.

Same work as the above, but the stanzas are given here in a different order.

No 10203. मुकुन्दमाला.

MUKUNDAMĀLĀ.

Pages, 5. Lines, 20 on a page.

Begins on fol. 39*b* of the MS. described under No. 2043.

Complete.

The stanzas are arranged in a different order.

Same work as the above, but with the addition of a few extra stanzas at the end as given below :—

अखिलविबुधधाम्ने तेजसामादिधाम्ने
श्रुतिकथितमहिम्ने ब्रह्मसंगीतधाम्ने ।
अमृतजलधिधाम्ने तुङ्गबद्धोरुधाम्ने
शमयितुमभिधास्ये रङ्गधाम्ने त्रिधाम्ने ॥ ४७ ॥
जय नारायण पुण्डरीकनयन शार्ङ्गिन् जगन्नायक
जय पीताम्बर भक्तवत्सल विरिञ्चिस्तोत्रपात्रक्रम ।

जय जम्भारिविरोधिविक्रमकथाश्लाघाविघातक्रम
जय गोविन्द मुकुन्द मन्दरधर शौरे मुरारे हरे ॥

Colophon:

मुकुन्दमालास्तोत्रं संपूर्णम् ॥

No. 10204. मुकुन्दमाला.

MUKUNDAMĀLĀ.

Pages, 14. Lines, 5 on a page.

Begins on fol. 6*a* of the MS. described under No. 9753.

Contains thirty-five stanzas from the beginning arranged in a different order.

Same work as the above.

No. 10205. मुकुन्दमाला—आन्ध्रटीकासहिता.

MUKUNDAMĀLĀ WITH TELUGU MEANING.

Substance, palm-leaf. Size, $15\frac{1}{4} \times 2\frac{1}{2}$ inches. Pages, 11. Lines, 13 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other works herein are Pādukāsahasra 7*a*, Āḻvārvaibhava 41*a*.

Contains thirty-five stanzas from the beginning arranged in a different order.

Same work as the above, but with Telugu meaning.

No. 10206. मुकुन्दमाला—कर्णाटकटीकासहिता.

MUKUNDAMĀLĀ WITH KANARESE MEANING.

Pages, 102. Lines, 5 on a page.

Begins on fol. 24*a* of the MS. described under No. 9727.

Complete.

Same work as the above, but with Kanarese meaning.

No. 10207. मुकुन्दाष्टकम्.
MUKUNDĀṢṬAKAM.

Pages, 2. Lines, 6 on a page.

Begins on fol. 27*b* of the MS. described under No. 9534.

Complete.

Eight stanzas in praise of Kṛṣṇa conceived as a child.

Beginning:

करारविन्देन पदारविन्दं मुखारविन्दे विनिवेशयन्तम् ।
वटस्य पत्रस्य पुटे शयानं बालं मुकुन्दं मनसा स्मरामि ॥ १ ॥

End:

संहृत्य लोकान्वटपत्रमध्ये शयानमाद्यन्तविहीनरूपम् ।
सर्वेश्वरं सर्वहितावतारं बालं मुकुन्दं मनसा स्मरामि ॥ ८ ॥
एवं मुकुन्दाष्टकमादरेण सकृत्पठेत्सः(यः)स लभेत्समृद्धिम् ।
ज्ञानप्रदं पापहरं पवित्रं श्रियं च विद्यां च सुखं च कीर्तिम् ॥ ९ ॥

No 10208. मुकुन्दाष्टकम्.
MUKUNDĀṢṬAKAM.

Pages, 2. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 9729.

Complete.

Same work as the above.

No. 10209. मुकुन्दाष्टकम्.
MUKUNDĀṢṬAKAM.

Pages, 3. Lines, 4 on a page.

Begins on fol. 69*b* of the MS. described under No. 8904 and not on fol. 69*a* as stated therein.

Complete.

Same work as the above, with the stanzas arranged in a different order.

No. 10210. मुकुन्दाष्टकम्.
MUKUNDĀṢṬAKAM.

Pages, 2. Lines, 5 on a page.

Begins on fol. 11*a* of the MS. described under No. 8904.

Complete.

Same work as the above, but with the colophon as given below:—

मुकुन्दाष्टकं संपूर्णम् ॥

No. 10211. मुकुन्दाष्टकम्.
MUKUNDĀṢṬAKAM.

Page, 1. Lines, 7 on a page.

Begins on fol. 58*a* of the MS. described under No. 9706.

Complete.

Same work as the above.

No. 10212. यथोक्तकारिस्तोत्रम्.
YATHŌKTAKĀRISTŌTRAM.

Pages, 2. Lines, 12 on a page.

Begins on fol. 16*b* of the MS. described under No. 3550.

Complete.

In praise of Vēgāsētu worshipped in a temple at Conjeeveram. He is so called because he is said to have stemmed the rapidity of Sarasvatī, when she rushed in the form of a stream to flood the sacrificial ground of her husband, Brahman. He is also called Yathōktakārin as he is believed to have followed his devotee Tirumaḻiśaiyāḻvār out of Conjeeveram at his request.

The work was composed by Vēdāntadēśika.

Beginning :

श्रीमान् . सदा हृदि ॥

एकं वेगवतीमध्ये हस्तिशैले श(च) दृश्यते ।
उपायफलभावेन स्वयं व्यक्तं परं महः ॥

ईष्टे गमयितुं पारमेष सेतुरभङ्गुरः ।
यत्र सारस्वतस्रोतो विश्राम्यति विशृङ्खलम् ॥
जयति जगदेकसेतुर्वेगवतीमध्यलक्षितो देवः ।
प्रशमयति यः प्रजानां प्रथितान् संसारजलधिकल्लोलान् ॥

End :

वेगासेतोरिदं स्तोत्रं वेङ्कटेशेन निर्मितम् ।
ये पठन्ति जनास्तेषां यथोक्तं कुरुते विभुः ॥

Colophon :

इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु यथोक्तकारिस्तोत्रं संपूर्णम् ॥

कवितार्किक . . . . गुरवे नमः ॥

No. 10213. यथोक्तकारिस्तोत्रम्.
YATHŌKTAKĀRISTŌTRAM.

Pages, 2. Lines, 5 on a page.

Begins on fol. 5*a* of the MS. described under No. 2422 and not on fol. 4*a* as stated therein.

Complete

Same work as the above.

No. 10214. यथोक्तकारिस्तोत्रम्.
YATHŌKTAKĀRISTŌTRAM.

Pages, 4. Lines, 5 on a page.

Begins on fol. 5*a* of the MS. described under No. 9782.

Complete.

Same work as the above.

No. 10215. यथोक्तकारिस्तोत्रम्.
YATHŌKTAKĀRISTŌTRAM.

Pages, 2. Lines, 8 on a page.

Begins on fol. 28*a* of the MS. described under No. 9012.

Complete.

Same work as the above.

No. **10216.** यथोक्तकारिस्तोत्रम्.
YAṬHŌKTAKĀRISTŌTRAM.

Pages, 3. Lines, 5 on a page.

Begins on fol. 98*a* of the MS. described under No. 5224.

Complete.

Same work as the above, but with colophon as given below :—

संपूर्णं यथोक्तकारिस्तोत्रम् ॥

No. **10217.** यथोक्तकारिस्तोत्रम्.
YATHŌKTAKĀRISTŌTRAM.

Pages, 3. Lines, 5 on a page.

Begins on fol. 71*b* of the MS. described under No. 9388

Complete.

Same work as the above, but with colophon as given below, wherein it is called Vēgāsētustuti :—

इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु वेगासेतुस्तुतिः संपूर्णा ॥

No. **10218.** यथोक्तकारिस्तोत्रम्.
YATHŌKTAKĀRISTŌTRAM.

Pages, 2. Lines, 8 on a page.

Begins on fol. 1*a* of the MS. described under No. 9850.

Complete.

Same work as the above.

No. **10219.** यदुगिरिनारायणमङ्गलाशासनम्.
YADUGIRINĀRĀYAṆAMAṄGALĀŚĀSANAM.

Page, 1. Lines, 8 on a page.

Begins on fol. 16*a* of the MS. described under No. 9651.

Complete.

A number of eulogistic stanzas wishing benediction on God Viṣṇu worshipped under the name of Nārāyaṇa in the temple at Mēlkōṭa in the Mysore State.

Beginning:

नारायणाचलोत्तुङ्गशृङ्गशृङ्गारमूर्तये ।
रामानुजार्यवर्यस्य वरमित्राय मङ्गलम् ॥ १ ॥
प्रफुल्लविमला(नयना)म्भोजभ्रमद्भ्रमरसुभ्रुते(वे) ।
करुणासिन्धुलहरीकटाक्षायास्तु मङ्गलम् ॥ २ ॥

End:

अस्मच्छ्रितानां संपत्तिं दास्यामि विविधां परम् ।
इत्येवं यदुशैलाग्रनिलयायास्तु मङ्गलम् ॥ २० ॥

No. 10220. यदुगिरिनारायणमङ्गलाशासनम्.
YADUGIRINĀRĀYAṆAMAṄGALĀŚĀSANAM.

Pages, 3. Lines, 6 on a page.

Begins on fol. 7*b* of the MS. described under No. 9655, wherein this work has been mentioned as Sampatkumāramaṅgalāśāsana in the list of other works given therein.

Wants the last stanza.

Same work as the above, but with colophon as given below :—

यदुगिरीशस्वामिमङ्गलाशासनं संपूर्णम् ॥

No. 10221. यदुगिरिनारायणसुप्रभातम्.
YADUGIRINĀRĀYAṆASUPRABHĀTAM.

Page, 1. Lines, 7 on a page.

Begins on fol. 41*b* of the MS. described under No. 660 of the Descriptive Catalogue of the Tamil MSS.

Breaks off in the sixth stanza.

Stanzas wishing good morning to and in praise of Tirunārāyaṇa or Sampatkumāra as worshipped in Mēlkōṭa.

Beginning:

श्रीनारायण यादवाचलपते श्रीभाष्यकारप्रिय
श्रीतार्क्ष्याहृतदिव्यरत्नमुकुट श्रीकारिमौले हरे ।

श्रीरामप्रिय यादवान्वयनिधे श्रीरामकृष्णार्चित
स्वामिन् जागृहि सुप्रभातमधुना संपत्कुमारास्तु ते ॥ १ ॥

End:

सुशोभनमहो नृणां सुखकृदेति रात्रिर्गता
दिशो दश विनादिता दिनमुखोत्थशङ्खस्वनैः ।
यशोऽधिक दयानिधे यदुगिरीश नारायण
प्रशोधयितुमस्तको(?)भवतु सुप्रभातं तव ॥ ९ ॥
नभो विमलमण्डजा नगकुलायमन्तर्गताः शुभोदकमुपाहृतं.

Nh. 10222. यदुगिरिनारायणस्तोत्रम्.
YADUGIRINĀRĀYAṆASTŌTRAM.

Pages, 2. Lines, 8 on a page.

Begins on fol. 91*a* of the MS. described under No. 9001.

Complete.

In praise of Nārāyaṇa as worshipped at Mēlkōṭa on the hill called Yadugiri.

Beginning:

श्रीमन्नारायण स्वामिन् वर्धतां विजयी भवान् ।
दिव्यं त्वदीयमैश्वर्यं निर्मर्यादं विजृम्भताम् ॥
देवीभूषायुधैर्नित्यैर्मुक्तैर्मोक्षैकलक्षणैः ।
सत्त्वोत्तरैस्त्वदीयैश्च सङ्गः स्तात्सरसस्तव ॥

End:

अज्ञानजन्मगृहमात्मगुणैर्विमुक्तमाज्ञातिलङ्घनपरं यदुशैलनाथ ।
मिथ्याप्रपन्नमपि मामवलोकय त्वं लक्ष्मीं क्षमामपि गुरूनवलोक्य पूर्वान् ॥

Colophon:

इति श्रीमद्यदुगिरिनारायणस्तोत्रं समाप्तम् ॥

No. 10223. यदुगिरिनारायणस्तोत्रम्.

YADUGIRINĀRĀYAṆASTŌTRAM.

Substance, palm-leaf. Size, $8\frac{3}{4} \times 1\frac{3}{4}$ inches. Pages, 27. Lines, 7 on a page. Character, Grantha and Tamil. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other works herein are Samprōkṣaṇavidhi 15*a*, Subhāṣita 21*a*, Śiṅgarāryadinacaryā 24*a*, Nānāsaṁhitāvacanāni 35*b*, Tirumantrārthaśārrumurai (Tamil) 40*a*, Saṅkramaṇanirṇaya 43*a*, Tirumalaisāgaradaśāsana 44*a*, Śiṅgarāryacaramaślōka 84*a*, Bahirmātṛkānyāsa 84*b*, Varuṇādijapa 86*a*.

Complete.

Similar to the above. Apparently by Tirumalārya or Śrīśailasūri, son of Kauśika Nṛsiṁha and disciple of Vādhūla Śrīnivāsa.

Beginning:

वाधूलश्रीनिवासार्यकृपासंपन्नवैभवम् ।
कौशिकश्रीनृसिंहार्यं कल्याणगुणमाश्रये ॥ १ ॥
आशासे षट्पदामोदवहां गुरुपरम्पराम् ।
श्रीनारायणपादाब्जमधुधारामिवापराम् ॥ २ ॥
एधतां यतिराजस्य साम्राज्यं सर्वतोमुखम् ।
यत्र संपत्कुमारोऽपि युवराजपदास्पदम् ॥ ३ ॥
वन्दे भगवतः पादूं वकुलामोदमेदुराम् ।
तत्पदामर्शसंपन्नमञ्जुशिञ्जामनोरमाम् ॥ ४ ॥
स्वामी सुशीलः सुलभः सर्वज्ञः सर्वशक्तिधृत् ।
वत्सलो यत्सहायस्तां वन्दे यदुगिरीश्वरीम् ॥ ५ ॥
अस्ति स्वस्तिवहं लक्ष्मीसंस्कृतं वस्तु निस्तुलम् ।
भूनीलास्तनकस्तूरीभूषितं यदुभूधरे ॥ ६ ॥

End:

अश्वत्किरीटमलकावृतफालमाय-
नेत्राब्जमङ्कुरितहासमुदग्रनासम् ।

विष्वग्भुजं विपुलवक्षसमीक्षिषीय
संपत्सुतं तत इतः पुरतोऽभितश्च ॥ ७७ ॥

* * * *

अचिन्तयित्वा मद्वृत्तमालोच्याचार्यसन्ततिम् ।
दयानिधे निधेहि त्वद्दासदास्यश्रियं मयि ॥ ८९ ॥

No. 10224. यदुगिरिनारायणस्तोत्रम्.

YADUGIRINĀRĀYAṆASTŌTRAM

Substance, palm-leaf. Size, $14\frac{3}{8} \times 1\frac{1}{4}$ inches. Pages, 18. Lines, 5 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Begins on fol. 18*a* The other works herein are Nārāyaṇaśabdārthavicāra 1*a*, Guṇādhikaraṇavāda 13*a*, Rāmastōtra 28*a*.

Wants the first stanza; otherwise complete.

Same work as the above, but with colophon as given below:—

यदुगिरिनारायणस्तवः संपूर्णः ॥

No. 10225. यदुगिरिनारायणस्तोत्रम्— सव्याख्यानम्.

YADUGIRINĀRĀYAṆASTŌTRAM WITH COMMENTARY.

Substance, palm-leaf. Size, $8\frac{3}{8} \times 1\frac{1}{4}$ inches. Pages, 122. Lines, 9 on a page. Character, Grantha. Condition, slightly injured Appearance, old.

Begins on fol. 5*a*. The other work herein is Sudarśanamantra 1*a*.

Complete.

Same work as the above, but with a commentary.

Beginning:

श्रीकौशिकान्वयनृसिंहगुरोस्तनूजं तत्सेवयाप्तनिगमान्तयुगार्थतत्त्वम् ।
श्रीश्रीनिवासगुरुवर्यदयैकपात्रं श्रीशैलदेशिकमहं शरणं प्रपद्ये ॥

श्रीमान् समस्तकल्याणगुणामृतमहोदधिः ।
यतिराजकुमारो नः पायाद्यदुगिरीश्वरः ॥

श्रीकान्त सन्ततमवाप्तसमस्तकाम निर्धूतहेयकुल भव्यगुणैकतान ।
सर्वज्ञ सर्वहित सर्वग सर्वशेषिन् श्रीयादवाचलनिधे मयि संनिधेहि ॥

द्रयानुसंधानसुधाब्धिरङ्गत्तरङ्गतादात्म्यवहैर्वचोभिः ।
श्रीशैलसूरिप्रवरात्प्रवृत्तः स्तवो भवोष्माणमपाकरोति ॥

अथ तत्रभवान् तिरुमलार्यो द्रयार्थतत्त्वमनुसंदधानस्तत्परीवाहरूपमभिरूपं यदुगिरिनारायणस्तवमारभमाणस्तदादौ

* * * *

स्वाचार्यप्रपदनात्मकं पद्यमादौ निबध्नाति—वाधूलेति ॥

वाधूलश्रीनिवासार्ये . . . कल्याणगुणमाश्रये ॥

वाधूलश्रीनिवासार्यस्य स्वाचार्यस्य कृपया निर्हेतुकदयया संपन्नं सम्यक्प्राप्तं वैभवमर्थपञ्चकयाथात्म्यज्ञानरूपं येन तम् ।

End :

अचिन्तयित्वा मद्वृत्त . . . दासदास्यश्रियं मयि ॥

हे दयानिधे परदुःखासहिष्णो; परदुःखासहिष्णुत्वं दयेति पूर्वाचार्याः ।

* * * *

अपराधानालोचनेनैतादृशफलप्रदानरूपार्थस्य दयानिधिपदेन समर्थनात् काव्यलिङ्गमलंकारः ॥

श्रीकौशिकान्वयनृसिंहगुरोस्तनूजं . . श्रीशैलदेशिकमहं शरणंप्रपद्ये॥

Colophon :

इति श्रीयदुगिरिनारायणस्तवव्याख्यानं संपूर्णम् ॥

सोऽयं नृसिंहदेशिकसप्रेमाज्ञप्तिसंभृताधिकृतिः ।
भक्त्या व्यजिज्ञपदसौ यदुगिरिनारायणस्तवं भव्यम् ॥

No. 10226. यादवाचलपतिसुप्रभातम्.

YĀDAVĀCALAPATISUPRABHĀTAM.

Pages, 6. Lines, 6 on a page.

Begins on fol. 18*a* of the MS. described under No. 9704.

Complete.

Similar to the work described under No. 10221.

Beginning:

श्रीमन् यदुक्षितिभृदीश हरे मुरारे नारायण प्रणतसंसृतिनारकाङ्के ।
श्रीमन्दिरायितमनोज्ञविशालवक्षः श्रियादवाचलपते तव सुप्रभातम् ॥ १ ॥

End:

प्रातः सुनिश्चलमतिर्यदुशैलबन्धोर्यो वा पठेदनुदिनं यदि सुप्रभातम् ।
तस्मै विहङ्गरमणः कमलासहायो नारायणो नतगतिं सुलभां प्रसूते ॥ ९ ॥

जय जय सुप्रभातमरविन्दविलोचन ते
जय जय यादवाद्रिशिखरोज्ज्वलदीप हरे ।
जय जय भाष्यकारकृतमङ्गल भक्तनिधे
जय जय देवदेववनितामभिनन्दनयः(य नः) ॥ १० ॥

श्रीकल्याणीतटविलसद्यदुगिरीश नारायणाद्रिकल्पकतरो संपत्कुमार भवते नित्यश्रीर्नित्यश्रीर्नित्यमङ्गलं भूयात् ॥

No. 10227. यादवाष्टकम्.
YĀDAVĀṢṬAKAM.

Substance, palm-leaf. Size, $16\frac{1}{8} \times 1\frac{3}{8}$ inches. Pages, 4. Lines, 5 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins on fol. 40*a*. The other work herein is Yādavarāghavīya 1*a*.

Complete.

Eight stanzas in praise of Lord Kṛṣṇa, the repetition of which is held to be efficacious in the accomplishment of one's desires.

Beginning:

माधवानन्त केशवाच्युत वासुदेव जगत्पते
मीन कच्छ(प)नारसिंह श्रीवीरराघव पाहि माम् ।
निर्जरार्चितमौनिसंनुत नीरजाक्ष दा(दया)निधे
देवनायक देहि मे तव पादभक्तिमचञ्चलाम् ॥ १ ॥

श्रीकरं करुणाकरं मुनिमानसाम्बुजवासिनं
पाकशासनसेवितं फणिराजतल्पसुशायिनम् ।
शोकमोहविनाशकं सुगुणाकरं शुभदायकं
लोकजीवनहेतुकं प्रणमामि यादवकुञ्जरम् ॥ २ ॥

End:

कृष्ण कृष्ण नमस्तेऽस्तु त्वयि भक्तिमचञ्चलाम् ।
इष्टकामार्थसिद्धिं च देहि मे मधुसूदन ॥ १२ ॥
यादवाष्टकमिदं पुण्यं यः पठेत्सततं नरः ।
सर्वसिद्धिं च संप्राप्य (श्री)कृष्णपदमाप्नुयात् ॥ १३ ॥

Colophon:

इति यादवाष्टकं संपूर्णम् ॥

No 10228. रघुनाथस्तवराजः.
RAGHUNĀTHASTAVARĀJAḤ.

Pages, 6. Lines, 8 on a page.

Begins on fol. 28*a* of the MS. described under No. 9729.

Complete; as found in the Hiraṇyagarbhasaṁhitā.

This is in praise of Raghunātha or Rāma. It is held to be the essence of all the Vēdas and is said to have been taught by Nārada, the son of Brahman.

Beginning:

सूत उवाच—

सर्ववेदार्थतत्त्वज्ञं व्यासं सत्यवतीसुतम ।
धर्मपुत्रः प्रहृष्टात्मा प्रत्युवाच मुनीश्वरम् ॥

* * * *

स्तवराजं पुरा प्रोक्तं नारदेन महात्मना ।
तत्सर्वं संप्रवक्ष्यामि हरिध्यानपुरःसरम् ॥
तापत्रयाग्निशमनं सर्वपापनिकृन्तनम् ।
दारिद्र्यदुःखशमनं सर्वसंपत्प्रदायकम् ॥

विज्ञानविमलं दिव्यं मोक्षैकफलसाधनम् ।
नमस्कृत्वा प्रवक्ष्यामि रामं कृष्णमनामयम् ॥
अयोध्यानगरे रम्ये रत्नमण्डपमध्यमे ।
स्थिरे कल्पतरोर्मूले रत्नसिंहासनं शुभम् ॥
तन्मध्येऽष्टदलं पद्मं नानारत्नसुशोभितम् ।
स्मरेद्दाशरथिं मध्ये सहस्रादित्यतेजसम् ॥

End:

इति श्रीरघुनाथस्य स्तवराजं महोत्तमम् ।
ब्रह्मपुत्रेण कथितं वेदानां सारमुत्तमम् ॥

* * * *

रामाय रामभद्राय रामचन्द्राय वेधसे ।
रघुनाथाय नाथाय सीतायाः पतये नमः ॥

Colophon:

इति श्रीहिरण्यगर्भसंहितायां ब्रह्मनारदसंवादे श्रीरघुनाथस्तवराजं (जो) नाम स्तोत्रम् ॥

No. 10229. रघुवीरगद्यम्.

RAGHUVĪRAGADYAM.

Pages, 6. Lines, 8 on a page.

Begins on fol. 73*a* of the MS. described under No. 9610.

Complete.

A prose work containing a number of attributes in the vocative case praising the exploits of Rāma: by Vēdāntadēśika This work is called Mahāvīragadya in the colophon, although it is widely known as Raghuvīragadya.

Beginning:

जयत्याश्रितसन्त्रासध्वान्तविध्वंसनोदयः ।
प्रभावान् सीतया देव्या परमव्योमभास्करः ॥

नमस्तस्मै कस्मैचन भवतु निष्किञ्चनजन-
स्वयंरक्षादीक्षासमधिकसमिन्धानयशसे ।
सुराधीशस्वैरक्षणकुपितशापायुधवधू-
दृषत्त्वादुर्जातिप्रशमनपदाम्भोजरजसे ॥

जय जय महावीर महाधीरधौरेय देव(वासुर)महासमरसमयसमुदित-निखिलनिर्जरनिर्धारितनिरवधिकमाहात्म्य दशवदनदमितदैवतपरिषदभ्य-र्थितदाशरथिभाव ।

End :

भवतपनतापितभक्तजनभद्राराम श्रीरामभद्र नमस्ते नमस्ते ॥

कविकथकसिंहकथितं कठोरसुकुमारगुम्भगम्भीरम् ।
भवभयभेषजमेतत्पठत महावीरवैभवं सुधियः ॥

Colophon :

इति श्रीमद्वेदान्ताचार्यनिर्मितं महावीरगद्यं समाप्तम् ॥

No. 10230. रघुवीरगद्यम्.

RAGHUVĪRAGADYAM.

Pages, 7. Lines, 24 on a page.

Begins on fol. 87*a* of the MS. described under No. 5959.

Complete.

Same work as the above, with differences in reading and with the following stanza at the end :—

End :

श्रीरामभद्राय नमस्ते पुनस्ते नमः ॥
नमः प्रजेशप्रमुखपुत्रपौत्रादिशालिने ।
नमस्सीतासमेताय रामाय गृहमेधिने ॥
कवितार्किकसिंहाय कल्याणगुणशालिने ।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः ।

No. 10231. रघुवीरगद्यम्.
RAGHUVĪRAGADYAM.

Pages, 7. Lines, 8 on a page.

Begins on fol. 90*a* of the MS. described under No. 2833.

Complete.

Same work as the above, but with the addition of one stanza in the beginning as given below and without colophon :—

वादिद्विपशिरोभङ्गपञ्चाननपराक्रमः ।
श्रीमान् वेङ्कटनाथार्यो वेदान्तगुरुरेधताम् ॥

No. 10232. रघुवीरगद्यम्.
RAGHUVĪRAGADYAM.

Pages, 9. Lines, 5 on a page.

Begins on fol. 47*a* of the MS. described under No. 8900.

Complete.

Same work as the above, with two additional stanzas in the beginning.

Beginning :

प्रणतिं वेङ्कटेशस्य पदयोर्विदधीमहि ।
यदुक्तयो यतीन्द्रोक्तरहस्यानां रसायनम् ॥
वादिद्विपशिरोभङ्गपञ्चाननपराक्रमः ।
श्रीमद्वेङ्कटनाथार्यो वेदान्तगुरुरेधताम् ॥

No. 10233. रघुवीरगद्यम्.
RAGHUVĪRAGADYAM.

Pages, 4. Lines, 8 on a page.

Begins on fol. 11*a* of the MS described under No. 9729

Complete.

Same work as the above.

No. 10234. रघुवीरगद्यम्.

RAGHUVĪRAGADYAM.

ages, 3. Lines, 20 on a page.

Begins on fol. 27*a* of the MS. described under No. 2043.

Complete.

Same work as the above.

No. 10235. रघुवीरगद्यम्.

RAGHUVĪRAGADYAM.

Pages, 7. Lines, 6 on a page.

Begins on fol. 11*a* of the MS. described under No. 2422.

Complete.

Same work as the above.

No. 10236. रङ्गनाथगद्यम्.

RAṄGANĀTHAGADYAM.

Pages, 2. Lines, 5 on a page.

Begins on fol. 32*a* of the MS. described under No. 9629.

Incomplete.

A prose alliterative composition in praise of God Raṅganātha as worshipped in the temple at Srirangam.

Beginning:

श्रीमहिमालयाशिशिर(रा)न्तरङ्ग त्रिपुरवरदय(या)सिन्धुतरङ्ग धीमन्पालितदीन सा(सर)साङ्गमामावारातिया . . . ॥ १ ॥ तरुणरविकिर(ण)विकसितरङ्ग हृदयकमलमध्यशोभितरङ्ग इन्दिराम्बुजवासितरङ्ग . ॥ २ ॥

End:

प्रलयकालनि . . वटपत्रशयन दिव्यगरुडवाहनरङ्ग दिव्यश्रीपादपद्मन(स)रङ्ग . . . . . ॥ ८ ॥

No. 10237. रङ्गनाथदण्डकः.
RAṄGANĀTHADAṆḌAKAḤ.

Pages, 2. Lines, 7 on a page.

Begins on fol. 12b of the MS. described under No. 9651.

Complete.

A kind of metrical composition known as Daṇḍaka written in praise of God Raṅganātha.

Beginning :

परिसरविततानवद्यं तदुद्यानहृद्यालयानङ्गविद्याविधौ दक्षविद्याधराद्युक्त गद्यादिसंयुक्तपद्यादिसंनादमिश्रालिझंकारसुश्राव्यपक्षस्वनाश्रान्तकोलाहलोपान्तमाणिक्यसोपान.

End :

चान्द्राब्जिनीतीरभव्यालये रत्नदिव्यासने सर्वसेव्याङ्घ्रिये(के) भृङ्गनीलालके तुङ्गशीलाधिके रङ्गभूपालके पाहि मां पाहि माम् ॥

No. 10238. रङ्गनाथदण्डकः.
RAṄGANĀTHADAṆḌAKAḤ.

Pages, 2. Lines, 11 on a page

Begins on fol. 43a of the MS. described under No. 4212, wherein this work has been omitted to be mentioned in the list of other works given therein.

Complete.

Similar to the above.

Beginning :

आचार्ये हृदये कवेरदुहितुश्चिन्तामणिर्जृम्भितः
सर्वाभिष्टफलप्रदो विजयते श्रीरङ्गमध्ये स्वयम् ।
यं सप्तावृतिरूपभोगवलयैः संवेष्टयन् सर्वदा

. . . .

लसति मत्तभृङ्गावलीनित्यशृङ्गारिताम्भोजसङ्गाधिकामोद्यनङ्गाकुलाम्भोवि-हङ्गातिवाचालतुङ्गाद्भुतश्रीतरङ्गावलीबाहुगङ्गामहागर्वभङ्गादतस्वान्तरङ्गापगा-रत्नधीराङ्गनालिङ्गिते ।

End:

संविधातुं श्रियं सूरिलोकाशयं साधु कर्तुं प्रियं सह्यजामाश्रयं संविदध-त्सन्नयं तुङ्गभूमा ह्ययं रङ्गधामा स्वयम् ॥

*   *   *   *

निधिं सौन्दर्याणां निखिलजगदाश्चर्यनिलयं
रमासंज्ञं रम्यं श्रुतियुवतिगीतस्वविभवम् ।
परं श्रीरङ्गेशप्रणयिप . . . . वतमिदं
स्तुवन् ध्यायन् पश्यन्नहमिह महानन्दभरितः ॥

Colophon:

श्रीरङ्गदण्डकं संपूर्णम् ॥

No. **10239.** रङ्गनाथपञ्चरत्नम्.

RAṄGANĀTHAPAÑCARATNAM.

Substance, palm-leaf. Size, $18\frac{3}{8} \times 1\frac{1}{4}$ inches. Pages, 2. Lines, 5 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins on fol. 12*a*. The other works herein are Rāmakarṇāmṛta 1*a*, Rāmamaṅgalāśāsana 10*a*, Vēdāntadēśikaprapatti 11*a*.

Complete in five stanzas.

Also called Kadāvāstōtra.

Same work as that described under No. 9875, with the stanzas arranged in a different order and without the sixth stanza, which has been given as the end therein But a short colophon is added as given below :—

पञ्चरत्नं संपूर्णम् ॥

No. 10240. रङ्गनाथविंशतिः.

RAṄGANĀTHAVIṂŚATIḤ.

Pages, 3. Lines, 9 on a page.

Begins on fol. 133*b* of the MS. described under No. 9653.

Complete.

Twenty stanzas in praise of God Raṅganātha.

Beginning :

श्रीमन् कृपाजलनिधे जगदेकबन्धो ब्रह्मादिदेवपरिपूजितपादपद्म ।
हेमापगापुलिनमध्यनिवासशील रङ्गेश सिन्धुतनयाप्रिय मङ्गलं ते ॥ १ ॥

End :

हे देवदेव पुरुषोत्तम लोकबन्धो माद्दृङ्मुमुक्षुजनरक्षणजागरूक ।
श्रीवासुदेव नतबृन्दमुदावहाद्य रङ्गेश सिन्धुतनयाप्रिय मङ्गलं ते ॥ २० ॥
प्रणतार्तिहराचार्यप्रकृष्टगुणशालिने ।
लीलयोद्धृतलोकाय लोकार्यगुरवे नमः ॥

No. 10241. रङ्गनाथसुप्रभातम्.

RAṄGANĀTHASUPRABHĀTAM

Pages, 2. Lines, 24 on a page.

Begins on fol. 115*a* of the MS. described under No. 5959.

Complete.

Stanzas wishing good morning to and in praise of God Viṣṇu worshipped under the name of Raṅganātha.

Beginning :

रङ्गे शयान ससुखं फणिराजतल्पे
तुङ्गे कवेरतनयापुलिने मनोज्ञे ।
सङ्गी विहाय परमेति पदे(दं) मुकुन्द
श्रीरङ्गनायक हरे तव सुप्रभातम् ॥ १ ॥

End :

प्रभातकाले परिगृह्य मालान्(:)
प्रयातिमे(न्ति ये) भागवता न(ह्य)नन्ताः ।
पश्यन्ति गायन्ति वदन्ति धन्याः
स्तुवन्ति रङ्गश्वर सुप्रभातम् ॥ २० ॥

Colophon :

श्रीरङ्गनायकस्तोत्रं संपूर्णम् ॥

No. **10242.** रङ्गनाथस्तोत्रम्.
RAṄGANĀTHASTŌTRAM.

Pages, 6. Lines, 4 on a page.

Begins on fol. 5*a* of the MS. described under No. 10015.
Complete.
Similar to the above.

Beginning :

सत्यस्वरूपममलं घनचित्प्रकाशं नित्यं निरञ्जनमजं निगमैकवेद्यम् ।
भक्तेप्सितार्थफलदं भवरोगवैद्यं श्रीरङ्गनाथअ(म)निशं कलयामि चित्ते ॥

End :

आपादमस्तकमनोहरभूषिताङ्गमाजानुबाहुमरविन्ददलायताक्षम् ।
आपूर्णचन्द्रवदनं नयनाभिरामं श्रीरङ्गनाथमनिशं कलयामि चित्ते ॥

* * * *

जिह्वे कीर्तय केशवं मुररिपुं चेतो भज श्रीधरं
पाणिद्वन्द्व समर्चयाच्युतकथाः श्रोत्रद्वय त्वं शृणु ।
कृष्णं लोकय लोचनद्वय हरेर्गच्छाङ्घ्रियुग्मालयं
जिघ्र घ्राण मुकुन्दपादतुलसीं मुर्धन् नमाधोक्षजम् ॥

No. 10243. रङ्गनाथादिमङ्गलाशासनम्.

RAṄGANĀTHĀDIMAṄGALĀŚĀSANAM.

Pages, 2. Lines, 15 on a page.

Begins on fol 143*a* of the MS. described under No. 5959

Complete.

A number of stanzas wishing benediction on God Raṅganātha, etc

Beginning:

लक्ष्मीचरणलाक्षाङ्कसाक्षाच्छ्रीवत्सवक्षसे ।
क्षेमंकराय सर्वेषां श्रीरङ्गेशाय मङ्गलम् ॥
श्रियः कान्ताय कल्याणनिधये निधयेऽर्थिनाम् ।
श्रीवेङ्कटनिवासाय श्रीनिवासाय मङ्गलम् ॥

End:

श्रीपराङ्कुशपादाब्जसुरभीकृतमौलये ।
श्रीवत्सचिह्ननाथाय यतिराजाय मङ्गलम् ॥
मङ्गलाशासनपरैर्मदाचार्यपुरोगमैः ।
सर्वैश्च पूर्वैराचार्यैः सत्कृतायास्तु मङ्गलम् ।

Colophon:

इति देवराज[छ]मङ्गलं संपूर्णम् ॥

No. 10244. रङ्गनाथादिमङ्गलाशासनम्.

RAṄGANĀTHĀDIMAṄGALĀŚĀSANAM.

Pages, 2. Lines, 9 on a page.

Begins on fol. 24*a* of the MS. described under No. 206, wherein this work has been mentioned as Maṅgalahāratiślōka in the list of other works given therein.

Complete.

Same work as the above, but without colophon.

No. 10245. रङ्गनाथादिमङ्गलाशासनम्.
RAṄGANĀTHĀDIMAṄGALĀŚĀSANAM.

Pages, 2. Lines, 12 on a page.

